ISSN 2250-1711

सत्यं ज्ञानमनन्तम्

# Journal of Veda Samskrta Academy

## A National Peer-Reviewed Research Journal

मूल्याङ्किता राष्ट्रियसंशोधनपत्रिका

Volume : XV
January to June - 2020

*Edited by the Director :*
**Dr. Gopalkrishna Hegde**
Jyotishashastra-Dharmashastra Vidwan

VEDA SAMSKRITA ACADEMY (R.)
Kalkod Road, Hegde - 581330, KUMTA, Uttara Kannada, Karnataka.

Journal of Veda Samskrita Academy
ISSN 2250-1711
Volume XV : January to June – 2020

# सङ्ख्या

डा. भास्करभट्टः जोशी (बेङ्गळूरु)

संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा॥

गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः॥ इति।१

अनया कारिकया ज्ञायते यत् सङ्ख्या-परिमाण-पृथकत्व-संयोग-विभागानाम् एतेषां पूर्वोक्तानां गुणानां सामान्यगुणत्वं साधर्म्यमित्यर्थः । अत्र सामान्यगुणत्वं नाम अनुगतः कश्चन धर्मविशेषः । स च विशेषगुणभिन्नगुणानां साधारणो विशेषगुणान्यत्वात्मक एव । एवञ्च सामान्यगुणानां लक्षणं 'निरुक्तविशेषगुणान्यगुणत्वम् 'इति पर्यवसन्नम् ।

रूपादिविशेषगुणान्यगुणाः सङ्ख्यादयः सामान्याः ,रूपादिविशेषगुणान्यगुणत्वं संख्यादिसामान्यगुणेषु अस्तीति लक्षणसमन्वयः ।

इतः परं संख्यादीनां साधर्म्यं निरूप्यते-

संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च २ ॥ ९२ ॥

एते तु द्वीन्द्रियग्राह्याः ३ ......॥ इति ॥

द्वीन्द्रियग्राह्याः इमे सामान्याः )सङ्ख्या-परिमाण-पृथकत्व-संयोग-विभागानाम् (सङ्ख्यादिगुणा इत्यनया कारिकया ज्ञायन्ते।एतेषां गुणानां संख्यादीनां द्वीन्द्रियग्राह्यत्वं साधर्म्यमित्यर्थः । द्वीन्द्रियं – चक्षुः त्वक् च। एवं च चाक्षुषत्वाचोभयप्रत्यक्षविषयत्वं संख्यादीनां )सङ्ख्या-परिमाण-पृथकत्व-संयोग-विभागाः (साधर्म्यमित्यर्थः ।

-----------------------------------

१. कारिकावली-का.सं. ९१

२. कारिकावली-का.सं. ९२

३. कारिकावली-का.सं. ९३

**संख्या**

"गणनाव्यवहारे तु हेतुः संख्याऽभिधीयते ४"

उक्तेषु चतुर्विंशतिर्गुणेषु अन्यतमा इयं सङ्ख्या । 'इदम् एकम्' 'इमौ द्वौ 'इति शब्दप्रयोगे एकत्वादिसङ्ख्याज्ञानं कारणम् । 'अर्थं बुध्वा शब्दरचना 'इति न्यायः । अर्थं प्रथमं स्वयं ज्ञात्वा परार्थं शब्दप्रयोगः कर्तव्यः । अतः पुरःस्थितं घटं प्रदर्श्य 'अयमेकः 'इति शब्दप्रयोगः एकत्वं घटे दृष्ट्वा कर्तव्यः । तादृशदर्शनविषयः एकत्वादिः सङ्ख्या ।

सा च सङ्ख्या एकत्वरूपा कनिष्ठा । परार्धा तु गरिष्ठा । ब्रह्मणः आयुः परमित्युच्यते। देवमानेन तत् शतवर्षाणि भवति । तच्च प्रथमद्वितीयभेदेन द्वेधा विभज्यते । द्वितीयपरार्धः सृष्टिकालः । स च मानुषप्रमाणेन ४३२कोटिवर्षाणि भवति । इदं ब्रह्माण्डस्यास्य आयुःप्रमाणम् । ततः अवान्तरप्रलयः इति वैशेषिकप्रक्रिया । इदम् अहोरात्रं दिनमेकं भवति । एवं पञ्चाषद्वर्षपरिमितम् आयुः परार्धसङ्ख्याभिधेयम् भवति । तस्मात् परार्धं गरिष्ठसङ्ख्या ।

अयमेकः ,इमौ द्वौ ,इमे त्रयः ,इति यो गणनात्मकशब्द-व्यवहारस्तत्र प्रकारतया संख्या असाधारणं कारणमित्यर्थः । लक्षणा-र्थस्तु 'एकत्वादिव्यवहाराऽसाधारणहेतुत्वमिति '। यत्किञ्चिद्व्यवहारा-साधारणकारणे घटादौ अव्याप्तिः ,अत्र दोषवारणाय -एकत्वादिति । यत्किञ्चिद्व्यवहारसाधारणकारणे कालादौ अतिव्याप्तिः ,अत्र वारणाय –असाधारणेति ।

**सङ्ख्यायाः लक्षणम्** :

तर्कसङ्ग्रहदारभ्य विभिन्नानि लक्षणानि प्रतिपादितानि ।

---

४. कारिकावली-का.सं. १०६

"एकत्वव्यवहारहेतुः संख्या" इति। "एकादिव्यवहार हेतुः संख्या ५" इति न्यायकन्दल्याम् । एतल्लक्षणं श्रीधराचार्येण इत्थमुपपादितम्- "व्यवहृतिर्व्यवहारो ज्ञेयज्ञानं व्यवह्रियते अनेनेति व्युत्पत्या व्यवहारशब्दः" तथा च एकादिव्यवहारः 'एकम्' 'द्वे' इत्यादिप्रत्ययः विशेषणकृतः प्रत्ययत्वात् दण्डीति प्रत्ययवत् । एतद् व्याख्यानुसारेण तावदेकादिव्यवहारो यद्येकादिप्रत्ययः, तदा तत्पक्षकमनुमानम् एकत्वादिसद्भावे प्रमाणम् । ६

सप्तपदार्थीनामके ग्रन्थे संख्यायाः लक्षणे निरूपिते । "संख्यात्वसामान्यवती संख्या" इति प्रथमं लक्षणम्, द्वीतीयम् "गणनासाधारणकारणं संख्या ७" इति । प्रथमं लक्षणं संख्यात्वजातिमवलम्बते । एतत्सिद्धौ नान्यत् किमपि विमर्शयोग्यम् । द्वितीये लक्षणे विमर्शनीयमस्ति । अस्मिन् लक्षणे असाधारणपदानिवेशे कार्यमात्रस्य कारणतया गणनात्मकस्यापि कार्यस्य कारणेश्वरज्ञानादावतिव्याप्तिः । तत्पदयोगे च गणनात्वावच्छिन्नकार्यतानिरूपितकारणतायाः लाभेन न दोषः । कार्यत्वरूपसामान्यधर्मत्वस्येव, ईश्वरज्ञानादीनां जन्यतावच्छेदकत्वाङ्गीकारात् ।

प्रशस्तपादभाष्यटीकायां – "गणितव्यवहारासाधारणकारणत्वं संख्यात्वम्"८ ।

**संख्याभेदाः**

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ।

---

५. न्यायकन्दली

६. सप्तपदार्थी

७. सप्तपदार्थी

८. वैशेषिकसूत्रम् (प्रशस्तभाष्यसहितम्)

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः ९ ॥
अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।
अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः१० ॥

एकत्वत्वविशिष्टा या संख्या नित्याऽनित्यभेदेन द्विविधा । तत्र नित्येषु आकाशादिषु परमाणुषु च समवेतमेकत्वं नित्यम् । एकत्वनाशं प्रति आश्रयनाशस्य हेतुत्वेन घटादिषु अनित्येषु वर्तमानमेकत्वम् अनित्यमित्यर्थः । द्वित्वादिकन्तु सकलनित्याऽनित्यपदार्थेष्वपि अनित्यमेव । द्वित्वादिकं प्रति समवायिकारणगतम् एकत्वम् असमवायिकारणम् ,अयमेकः अयमेकः इत्यादिका अपेक्षबुद्धिः निमित्तकारणम् । तादृशद्वित्वत्रित्वादयो व्यासज्यवृत्तिसंख्याः उच्यन्ते । इमाः संख्याः अपेक्षाबुद्धिजाः । परमाण्वादिषु अतीन्द्रियेषु ईश्वरीयाऽपेक्षाबुद्धिरूपकारणात् द्वित्वाद्युत्पत्तिरिति । ईश्वरबुद्धेर्नित्यत्वेऽपि ईश्वरीयाऽपेक्षाबुद्धिसहकारिक्षणविशेषस्य नाशात् द्वित्वनाशोपपादनम् । अपेक्षाबुद्धिनाशाच्चेति मूलस्य आश्रयनाशोपलक्षकत्ववत् ईश्वरीयाऽपेक्षाबुद्धिसहकारिक्षणनाशोपलक्षकत्वस्वीकारादिति ज्ञेयम् ।

एकत्वादेर्गुणात्मकसंख्यामात्ररूपत्वे गुणात्मकत्वेपि तस्य गुणादिवृत्तित्वसमर्थनेऽपि संख्याप्रभेदविषये मतभेदाः दृश्यन्ते ।

संख्यायाः मुख्यतया प्रकारद्वयम् इति प्रशस्तपादाचार्याः अङ्गीकुर्वन्ति । तद्यथा, एकद्रव्यवृत्तिसंख्या, अनेकद्रव्यवृत्तिसंख्या च इति । तत्र एकद्रव्यवृत्तिसंख्या केवलमेकत्वसंख्या, सा च आश्रयभेदेन भिन्ना, अनेकवृत्तिसंख्या द्वित्वमारभ्य परार्धपर्यन्ता ।

बहुत्वसंख्या त्रित्वादितो भिन्ना इति शङ्करमिश्रः वैशेषिकसूत्रो-

---

९. कारिकावली-का.सं. १०७

१०. कारिकावली- का. सं. १०८

पस्कारे एवं न्यायकन्दल्या श्रीधरश्च स्वमतं नरूपयतः । अभिप्रायस्तु इत्थम्- यदा असन्निहितेषु अनेकद्रव्येषु त्रित्वादिकं त्रित्वादिरूपेण न गृह्यते, तदा बहुत्वस्य बहुत्वत्वेन ग्रहणं भवति । ग्रहणं बहुत्वत्वेन यदि त्रित्वादिविषयकमेव, तदा बहुत्वसंख्यायाः न स्वतन्त्रसंख्यात्वम् । यदि च त्रित्वादिभिन्नस्य ग्रहणं बहुत्वत्वेन, तदा बहुत्व संख्या स्वतन्त्रा स्यात् । उदयनाचार्यास्तु बहुत्वत्वेन त्रित्वादेरेव ग्रहणम् इति प्रवदन्ति ।

नवीनन्यायग्रन्थेषु व्यासज्यवृत्यव्यासज्यवृत्तिभेदादेव संख्यायाः द्वैविध्यमुक्तम् । व्यासज्यवृत्तित्वम् नाम एकत्वतत्समनियतधर्मानवच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वम् । तच्च द्वित्वादौ वर्तते एव । अव्यासज्यवृत्तित्वं च एकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगित्वम् । तच्चैकत्वसंख्याया वर्तते ।

एकत्वसंख्या- एकत्वसंख्या नित्याऽनित्यभेदेन द्विधा विभक्ता । नित्यद्रव्येषु वर्तमाना एकत्वसंख्या नित्या । यथा आकाशादिषु वर्तमाना एकत्वसंख्या नित्या । एकत्वसंख्याश्रय आकशः, आकशस्य नित्यत्वात् तद्गत एकत्वसंख्या नित्या । अनित्यद्रव्येषु विद्यमाना तु एकत्वसंख्या अनित्या । एकत्वसंख्याश्रय घटः, स च अनित्यः, तद्गत एकत्वसंख्याऽपि अनित्या । उभयविधाप्येकत्वसंख्या एकद्रव्यमात्रनिष्ठा इत्यतः 'एकद्रव्या संख्या' इति शब्देनापि उच्यते । इयं सर्वासां संख्यानाम् उत्पादिका, तद्यथा, द्वाभ्यां कपालाभ्याम् उत्पद्यमाने घटे एकत्वस्य उत्पत्ति कपालगताभ्याम् एकत्वाभ्यां जायते ।

एकत्वप्रतीतेः रूपादिप्रतीतितः विलक्षणत्वेन अनुभवसिद्धत्वात्, एकत्वं रूपादितः भिन्नम् । किञ्च रूपादिशून्ये आकाशादावप्येकत्वस्य प्रतीयमानतया तस्य रूपादिव्यतिरिक्तत्वमावश्यकमेव । अत्र सूत्रम् – "रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरम् एकत्वम्" इति ११।

---

११. वैशेषिकसूत्रम्- ७-२-१

अनेकत्वसंख्या- एकत्वभिन्ना या संख्या सा अनेकत्वसंख्या । सा च द्वित्वादि परार्धपर्यन्ता । किरणावल्याख्ये ग्रन्थे उदयनाचार्यैः द्वित्वविषये अत्यन्तविस्तृततया निरूपितम् दरीदृश्यते । "द्वित्वादिका" इति पदस्य 'द्वित्वमादिरस्य' इति एवं परार्धपदस्य परार्धमन्तो यस्या इत्येवं व्युत्पत्तिः दर्शिता वर्तते ।

अपेक्षाबुद्धिः – "अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते ।" १२, इति अनेकानि एकत्वानि प्रकारा यत्र एतादृशी या बुद्धिः (एकत्ववत्, एकत्ववत्, एकत्ववत् इत्याकारिका) सा अपेक्षाबुद्धिरित्यर्थः । "अपेक्षा-बुद्धिर्नाम विनाशप्रतियोगिनी बुद्धिरिति बोद्धव्यम्" (सर्वदर्शनसङ्ग्रहः) विनाशको यो विनाशः तस्य प्रतियोगिभूता या बुद्धिः सा अपेक्षाबुद्धि-रित्यर्थः ।

इयं बुद्धिः द्विधा नित्याऽनित्या च । इश्वरीया या अपेक्षाबुद्धिः सा नित्या । सा हि परमाणुषु द्वित्वोत्पादिका । योगिनां अपेक्षाबुद्धिः अनित्या । एवम् अस्मदीया या अपेक्षाबुद्धिः सापि अनित्या । सा हि एकत्वज्ञानरूपनिमित्तम्, अनेकद्रव्यसन्निधानं च अपेक्ष्य उत्पद्यते । तन्नाशश्च द्वित्वप्रत्यक्षात् जायते ।

न्यायमते इत्थम् संख्या परमृष्टा वर्तते ।

## आधरग्रन्थाः


४. न्यायकुसुमाञ्जलिः

५. न्यायभाष्यम्

६. न्यायकन्दली

७. वैशिकसूत्रम्(भाष्यसहितम्)

८. मुक्तावली

१. सर्वदर्शनसङ्ग्रहः
२. सप्तपदार्थी
३. तर्कसङ्ग्रहः

**डा. भास्करभट्टः जोशी**
सहायकप्राध्यापकः
न्यायशास्त्रविभागः
कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः
चामराजपेटे-५६००१८
बेङ्गळूरु, कर्नाटक
Mobil : 9742269403
**E-mail : joshi.bhat@gmail.com**

********